# Vishvakarmakrita Jaganmata Stuti

# વિશ્વકર્મકૃતા જગન્માતાસ્તુતિઃ

## Document Information

Text title : Vishvakarmakrita Jaganmata Stuti

File name : jaganmAtAstutiHvishvakarmakRRitA.itx

Category : devii, gaNeshapurANa, stuti

Location : doc_devii

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 95 | 2.95 5-15||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# વિશ્વકર્મકૃતા જગન્માતાસ્તુતિઃ

વિશ્વકર્મોવાચ ।
નમામિ વિશ્વેશ્વરિ ! વિશ્વરૂપે ! બ્રહ્મેન્દ્રરુદ્રાર્યમવિષ્ણુરૂપે ! ।
ત્વયા તતં વિશ્વમનન્તશક્તે બ્રહ્માદિદેવૈરભિનન્દ્યરૂપે ! ॥ ૫॥

ત્વમેવ વિશ્વં રજસા વિધત્સે સત્ત્વેન માતઃ પરિપાસિ તચ્ચ ।
ત્વમેવ સર્વં તમસાઽથ હંસિ ત્રૈગુણ્યમેતત્ તવ નિત્યરૂપમ્ ॥ ૬॥

ત્વયા હતા દૈત્યગણા વિમુક્તિં બ્રહ્મર્ષયો જ્ઞાનબલાત્ પ્રપન્નાઃ ।
ત્વમેવ વિષ્ણોરતુલાઽસિ શક્તિઃ સર્વસ્ય હેતુઃ પરમાઽસિ માયા ॥ ૭॥

સતોઽસતો યાઽપિ પરાસિ શક્તિશ્ચરાચરં ત્વં વિદધાસિ વિશ્વમ્ ।
સમ્મોહ્ય લોકાન્ સકલાન્ સુરેશાન્ કાષ્ઠાકલાભિશ્ચ દદાસિ ભોગમ્ ॥ ૮॥

યે ત્વાં પ્રપન્ના ન ભયન્તુ તેષાં મૃત્યોસ્તસ્થા દૈત્યકૃતં કદાચિત્ ॥ ૯॥

ત્વમેવ લક્ષ્મીઃ સુકૃતામલક્ષ્મીર્દુષ્ટાત્મનાં ત્વં પ્રમદાસ્વરૂપા ।
વિદ્યાસ્વરૂપાસિ જગત્રયે ત્વં પ્રભાસ્વરૂપા શશિસૂર્યયોત્સ્વમ્ ॥ ૧૦॥

ય આશ્રિતાસ્તે જગદાશ્રયાસ્તે વિપત્તિલેશો ન ચ તેષુ માતઃ ! ।
ત્વમેવ વિશ્વેશ્વરિ ! વિશ્વમેતદ્ધરસ્યથાપ્યાયસિ વારિરૂપા ॥ ૧૧॥

અનાદિમધ્યાઽનિધનાપ્યગમ્યા હરીશલોકેશસુરેશ્વરાણામ્ ।
તેઽનુગ્રહાત્ ત્વાં પ્રભજન્તિ ભક્તા આનન્દરૂપા નિવસન્તિ નાકે ॥ ૧૨॥

અભક્તિકામાન્ વિનિહંસિ રુષ્ટા ત્વામેવ માતઃ ! શરણં પ્રપન્નઃ ।
ધન્યે મમૈતે નયનેઽથ વિદ્યા જનુશ્ચ માતા પિતૃવંશ એવ ॥ ૧૩॥

કુલં ચધન્યં ચરણૌ ત્વદીયૌ દૃષ્ટૌ યતસ્તે જગદમ્બિકે ! મયા ।
ફલશ્રુતિઃ -
ક ઉવાચ ।
એવં સ્તુતા જગન્માતા વરમસ્મૈ ન્યવેદયત્ ॥ ૧૪॥

સ વવ્રે પરમાં ભક્તિં સાત તથેતિ તમબ્રવીત્ ।
ઇદં સ્તોત્રં પઠેદ્ યસ્તુ સર્વાન્ કામાઁલ્લભેચ્ચ સઃ ॥ ૧૫॥

સર્વત્ર વિજયં પુષ્ટિં વિદ્યામાયુઃ સુખં શિવમ્ ।

ઇતિ વિશ્વકર્મકૃતા જગન્માતાસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૯૫ । ૨.૯૫ ૫-૧૫॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 95 . 2.95 5-15..

Proofread by Preeti Bhandare

*Vishvakarmakrita Jaganmata Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*